# केन्द्रीयसंस्कृतविश्वविद्यालयः
# श्रीराजीवगान्धीपरिसरः शृङ्गेरी

## मीमांसाविद्याशाखा

## मीमांसापूर्वषट्कन्यायानां लोके शास्त्रान्तरे च सञ्चारः इति विषयिण्याः दिनद्वयव्यापिन्याः राष्ट्रियसङ्गोष्ठ्याः समग्रविवरणम्
## Two days National Seminar Report.

CSU/RGCS/A-12/2023-24/726(office order No 246) इति संख्याकस्य 6-10-2023 इति दिनाङ्कयुक्तस्य कार्यालयीयादेशस्य अनुसारेण मीमांसाविद्याशाखया "मीमांसापूर्वषट्कन्यायानां लोके शास्त्रान्तरे च सञ्चारः इति विषयिणी दिनद्वयव्यापिनी राष्ट्रियसङ्गोष्ठी शोभकृत् – कार्तिककृष्ण पञ्चम्यां षष्ठ्यां च (2,3,December 2023) समनुष्ठिता ।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य **कुलपतीनामाचार्याणां श्रीनिवासवरखेडी**महोदयानां संरक्षणे कुलसचिवानाम् **आचार्याणां गायत्री मुरलीकृष्ण**महाशयानां मार्गदर्शने **कुलपतिविशेषकार्याधिकारिणाम् आचार्याणां मधुकेश्वरभट्ट**महाभागानां सुचारुमार्गदर्शने **दर्शनविद्यास्थानाधिष्ठात्र्याः सत्यंकुमारी** महाभागायाः मार्गदर्शने परिसरनिदेशकानाम् **आचार्याणां हंसधरझा**महोदयानां निदेशने **मीमांसाविद्याशाखाध्यक्षाणाम् आचार्याणां सुब्राय वि भट्ट**महाभागानां मार्गदर्शने **मीमांसाविद्याशाखासमन्वयकानाम् आचार्याणां सूर्यनारायणभट्ट**महोदयानां समन्वयकत्वे समनुष्ठितायाः मीमांसापूर्वषट्कन्यायानां लोके शास्त्रान्तरे च सञ्चारः इति विषयिण्याः राष्ट्रियसङ्गोष्ठ्याः समग्रविवरणं प्रस्तूयते ।

**भूमिका –** ज्ञानं हि आत्मनः स्वभावः । जागरितः प्राणी कञ्चन विषयं चिन्तयत्येव । यदा तु तज्ज्ञानं संशयात्मकं भवति, तदा संशयविषयस्य निर्णयेऽपि प्रवर्तते । अन्ये तावद्विषयाः संशयिताः निर्णीयेरन्न वा , धर्मस्तु अवश्यमेव निर्णेयः । यतो हि – "धर्मो विश्वस्य जगतः प्रतिष्ठा"(तैत्तिरीयोपनिषत्) इत्युक्तरीत्या समग्रलोकस्य धारणे धर्म एव हेतुः । धर्मस्य अपालने अधर्मस्य अनुसरणे लोकस्यैव विप्लुतिः स्यात् । तस्मात् धर्माधर्मयोः स्वीकारत्यागार्थं निर्णयात्मकज्ञानस्य अपेक्षितत्वात्, वेदात् जातस्य धर्माधर्मज्ञानस्य च कदाचित् संशयात्मकत्वेन तत्र निर्णयप्राप्त्यर्थं मीमांसाशास्त्रमवतीर्णं यस्य च महर्षिणा जैमिनिना द्वादशस्वध्यायेषु निबन्धनं कृतम् । इदं च शास्त्रं न तेषां नियमानां विधायकं यैः नियमैः वेदवाक्यार्थनिर्णयः क्रियते, किन्तु लोके ये नियमा निसर्गतः अनुभूताः तान् युक्तिरूपेणोपजीव्य वेदवाक्यार्थं निर्णयति । अतः एतच्छास्त्रोक्ताः युक्तयः न वेदस्थकर्मकाण्डमात्रनिर्णयोपयुक्ता अपि तु संशयितविषयमात्रनिर्णये उपयुक्ताः, विशिष्य च वाक्यार्थनिर्णये । अत एव वयं पूर्वमीमांसान्यायसञ्चारं न्यायवेदान्तव्याकरणधर्मशास्त्रादिग्रन्थेषु पश्यामः ।

**सङ्गोष्ठ्याः प्रयोजनम् –**

अनया सङ्गोष्ठ्या शास्त्रान्तरेषु यत्र मीमांसान्यायाः सञ्चारिताः तेषां स्पष्टप्रतिपत्तिः जाता । एवं मीमांसान्यायैः कथं लोके सन्दिग्धार्थनिर्णयः कर्तुं शक्य इति ज्ञानमपि प्राप्तम् । तेन भारतीयज्ञानपरम्परायाः कथमाधुनिकसमाजे उपयोग इति प्रदर्शनाय कश्चन मार्गः क्लृप्तः ।

## सङ्गोष्ठ्यां भागग्रहणप्रक्रिया -

दिनद्वयव्यापिन्यां मीमांसापूर्वषट्कन्यायानां लोके शास्त्रान्तरे च सञ्चारः इति विषयिण्यां राष्ट्रियसङ्गोष्ठ्यां भागग्रहणाय 22-11-2023 दिनाङ्के google form सज्जीकृत्य सर्वेषाम् इच्छुकानां व्यवस्था परिकल्पिता ।

google form link – https://forms.gle/YDXiVPLqTU6La2Te9

सङ्गोष्ठ्याम् भागग्रहणाय/पत्रप्रस्तुतये इत्थं पञ्जीकरणशुल्कं निर्धारितम् –

**( a) विद्यार्थिनां कृते - रू 100**


**( b) शोधच्छात्राणां कृते - रू 200**

**( c) अध्यापकानाम् अन्येषां च कृते - रू 300**

❖ **मीमांसाराष्ट्रियसङ्गोष्ठीसम्बद्धतया परिसरीयवित्तकोशे रू. 5600/- आगतमस्ति ।**

## सङ्गोष्ठ्यां भागग्रहीतारः-

| बाह्याः विद्वांसः | अध्यापकाः | शोधच्छात्राः | छात्राः | आहत्यसंख्या |
|---|---|---|---|---|
| 07 | 14 | 4 | 15 | 40 |



# उद्घाटनकार्यक्रमः

समयः – 10-30 AM दिनाङ्कः – 02-12-2023

स्थानम् - परिसरसभाभवनम्

- ❖सभाध्यक्षः – प्रो.सि.एस्.एस्.नरसिंहमूर्तिवर्यः
- ❖उद्घाटकः – आचार्यः हित्लळ्ळी सूर्यनारायणभट्टवर्यः
- ❖स्वागतिकः – प्रो.सूर्यनारायणभट्टः
- ❖धन्यवादाविष्कर्ता – डा.एस्.वेङ्कटेशताताचार्यः

सञ्चालकः – डा.गोविन्दगोपालकृष्णहेगडे







# प्रथमसत्रम्

समयः - 11-30 AM

दिनाङ्कः - 02-12-2023

❖सत्राध्यक्षः - प्रो.गणेश.ईश्वर.भट्टवर्यः

❖पत्रप्रस्तोता – डा.कृष्णजोशीवर्यः स्वर्णवल्ली

❖सञ्चालकः - डा.गोविन्दगोपालकृष्णहेगडे





# द्वितीयसत्रम्

समयः – 02-30 PM

दिनाङ्कः – 02-12-2023

❖**सत्राध्यक्षः** – आचार्यः सूर्यनारायणभट्टः हित्लळ्ळी

❖**पत्रप्रस्तोतारौ** –1 डा.चक्रवर्तिवर्यः, मैसूरु

2 डा.आर्.नवीनवर्यः, काञ्चीपुरम्

❖**सञ्चालकः** – डा.एस्.वेङ्कटेशताताचार्यः





# तृतीयसत्रम्

**समयः – 04-30 PM** **दिनाङ्कः – 02-12-2023**

❖**सत्राध्यक्षः** – आचार्यः सुब्रायभट्टवर्यः

❖**पत्रप्रस्तोतारः** –1 डा.श्रीधर लोहोकरे
2 डा.दुर्गाशिरणरथवर्यः
3 डा.अरुणभट्टः
4 विद्वान् आदर्शभट्टवर्यः

❖**सञ्चालकः** – डा.गोविन्दगोपालकृष्णहेगडे








# चतुर्थसत्रम्

**समयः – 10-00 AM** **दिनाङ्कः – 03-12-2023**

❖**सत्राध्यक्षः** – आचार्यः सूर्यनारायणभट्टवर्यः
❖**पत्रप्रस्तोतारः** – 1 डा.गुरुराजकल्कुरवर्यः
2 डा.कोम्पेल्लिविनयकुमारवर्यः
3 विद्वान् महेशभट्टवर्यः तिरुपतिः

❖**सञ्चालकः** – डा.गोविन्दगोपालकृष्णहेगडे













# पञ्चमसत्रम्

**समयः – 11-30 AM** **दिनाङ्कः – 03-12-2023**

- ❖सत्राध्यक्षः – प्रो.चन्द्रशेखरभट्टवर्यः
- ❖पत्रप्रस्तोता –1. डा.गोविन्दगोपालकृष्णहेगडे
- ❖सञ्चालकः - डा.एस्.वेङ्कटेशताताचार्यः








# षष्ठसत्रम्

समयः – 02-30 PM

दिनाङ्कः – 03-12-2023

❖सत्राध्यक्षः –डा.एस्.वेङ्कटेशताताचार्यः
❖पत्रप्रस्तोतारौ –1 डा.श्यामसुन्दरवर्यः
2 डा.राघवेन्द्र पि आरोल्ली

❖सञ्चालकः – डा.गोविन्दगोपालकृष्णहेगडे







# समापनसत्रम्

समयः – 04-30 PM　　　　　　　　　　　　　　दिनाङ्कः – 03-12-2023

- ❖सभाध्यक्षः – प्रो.सि.एस्.एस्.नरसिंहमूर्तिः
- ❖सङ्गोष्ठीसत्राध्यक्षः – प्रो.सुब्राय वि भट्टः
- ❖स्वागतभाषणम् –प्रो.सूर्यनारायणभट्टः
- ❖पत्रप्रस्तोतारौ – डा.नारायणवैद्यः<br>श्री.सिद्धार्थशङ्करपण्डा
- ❖धन्यवादाविष्कृतिः –डा.एस्.वेङ्कटेशताताचार्यः
- ❖ सञ्चालकः – डा.गोविन्दगोपालकृष्णहेगडे







| भागग्राहिणः | प्रस्तुतविषयः |
|---|---|
| डा.हित्लळ्ळी सूर्यनारायणभट्टः बेङ्गळूरु | सहस्रनामव्याख्यासु मीमांसान्यायसञ्चारः |
| डा.कृष्णजोशी,स्वर्णवल्ली | कालस्य जन्यत्वे विरोधाधिकरणन्यायसञ्चारः |
| डा.चक्रवर्ती रामचन्द्रन् मैसूरु | लौकिकविवादानां समस्यानां च समाधाने मीमांसान्यायानां सञ्चारः |
| डा.गुरुराजकल्कूर् बेङ्गळूरु | एकादशीजयन्तीजन्माष्टमी विचारे मीमांसान्यायसञ्चारः |
| डा.श्रीधर लोहोकरे पुणे | आकाशस्तल्लिङ्गादित्यत्र सामर्थ्याधिकरणन्यायसञ्चारः |
| श्री महेश भट्टः तिरुपतिः | भूषणसारे एकप्रसरताविचारः |
| डा.आर् नवीनः काञ्चीपुरम् | न्यायसिद्धान्तमुक्तावल्यां प्रतिपादितानां मीमांसान्यायानाम् उपपादनम् |
| प्रो.सुब्राय वि भट्टः शृङ्गेरी | स्मार्तप्रयोगेषु तदन्तापकर्षन्यायसञ्चारः |
| प्रो.सूर्यनारायणभट्टः शृङ्गेरी | वार्तिकस्थानां मीमांसान्यायानां सर्वोपकारकत्वनिरूपणम् |
| प्रो.गणेश ईश्वर भट्टः शृङ्गेरी | वेदान्ते मीमांसान्यायसञ्चारः |
| प्रो चन्द्रशेखरभट्टः शृङ्गेरी | व्याकरणे मीमांसान्यायसञ्चारः |
| डा.एस् वेङ्कटेशताताचार्यः शृङ्गेरी | उद्गातृभक्षणाधिकरणन्यायस्य वेदान्ते चमसाधिकरणे सञ्चारः |
| डा.गोविन्दगोपालकृष्णहेगडे शृङ्गेरी | गुणानां च परार्थत्वात् असम्बन्धः समत्वात् स्यात् इति न्यायस्य व्याकरणे सञ्चारः |
| डा.नारायणवैद्यः शृङ्गेरी | शिक्षाक्षेत्रे मीमांसाशास्त्रोपयोगिता |
| डा.राघवेन्द्र पि आरोल्ली शृङ्गेरी | वेदान्तेषु मीमांसान्यायसञ्चारः |
| डा,श्यामसुन्दर ए शृङ्गेरी | मङ्गलस्य फलविशेषकल्पनायां विश्वजिन्न्यायसञ्चारः |
| डा.कोम्पल्लि विनयकुमारः शृङ्गेरी | विधेयार्थे अदग्धदहनन्यायसञ्चारः |
| डा दुर्गाशरणरथः शृङ्गेरी | मीमांसान्यायानां लोके सञ्चारक्रमः |
| श्री आदर्शविनायकभट्टः शृङ्गेरी | लोके शास्त्रान्तरे च योगसिद्ध्यधिकरणन्यायसञ्चारविमर्शः |
| श्री सिद्धार्थशङ्करपण्डा | विधिक्षेत्रे मीमांसापूर्वषट्कन्यायसञ्चारः |
| डा.अरुणभट्टः शृङ्गेरी | निषादस्थपत्यधिकरणं समासशक्तिः च |

# सङ्गोष्ठीसम्बद्धवित्तीयविवरणम्

केन्द्रीयसंस्कृतविश्वविद्यालयस्य (के.स.वि./प्रका.एवं कार्य./104-8/2023-24/680) इति संख्याकस्य 14-9-2023 इति दिनाङ्कयुक्तस्य पत्रस्य माध्यमेन कुलपतीनाम् अनुग्रहेण मीमांसाविषयसम्बद्धसङ्गोष्ठीसञ्चालनाय रु .100000/- (एकलक्षरूप्यकाणि) धनराशेः स्वीकृतिः सूचिता । प्राप्तधनराशेः दिनद्वयव्यापिन्याः राष्ट्रियसङ्गोष्ठ्याः सुचारुसञ्चालनाय इत्थम् उपयोगः कृतः -

| क्र.सं | क्रयविवरणम् | धनराशिः(RS) |
|---|---|---|
| 1 | गौरवसम्भावना (आहूतविदुषाम्) | 22,500/- |
| 2 | गमनागमनव्यवस्था | 18047/- |
| 3 | वासव्यवस्था | 10000/- |
| 4 | भोजनव्यवस्था | 23,500/- |
| 5 | अपेक्षितवस्तुक्रयणाय | 25404/- |
| | Total | 99451/- |

## धन्यवादाविष्कृतिः -

इत्थं मीमांसाविद्याशाखया कुलपतीनाम् आचार्याणां श्रीनिवासवरखेडीमहोदयानां संरक्षणे, कुलसचिवानाम् आचार्याणां गायत्री मुरलीकृष्णमहोदयानां मार्गदर्शने , आचार्याणां मधुकेश्वरभट्टमहाभागानां निर्देशने, दर्शनविद्यास्थानाधिष्ठात्र्याः सत्यंकुमारीमाहाभागायाः मार्गदर्शने, मीमांसाविद्याशाखाध्यक्षाणाम् आचार्याणां सुब्रायभट्टमहोदयानां मार्गदर्शने , परिसरीयनिदेशकानाम् आचार्याणां हंसधरझामहाभागानां निदेशने, मीमांसाविद्याशाखासमन्वयकानाम् आचार्याणां सूर्यनारायणभट्टमहोदयानां समन्वयकत्वे, इयं सङ्गोष्ठी समनुष्ठिता । तेभ्यः सर्वेभ्यः आचार्येभ्यः नमस्कारपूर्वकं धन्यवादं समर्पयावः । एवम् अस्माकं प्रार्थनाम् उररीकृत्य देशस्य नानाप्रान्तेभ्यः समागतेभ्यः पत्रप्रस्तोतृभ्यः विद्वद्भ्यः अन्येभ्यः भागग्राहिभ्यः कार्यक्रमसञ्चालने कृतोपकारेभ्यः परिसरस्य अध्यापकेभ्यः तान्त्रिकसहायकेभ्यः कार्यालयीयकर्मचारिभ्यः प्रियेभ्यः छात्रेभ्यः च धन्यवादाः वितन्यन्ते ।

**विद्वज्जनविधेयौ**

डा.एस्.वेङ्कटेशताताचार्यः (संयोजकः)

डा.गोविन्दगोपालकृष्णहेगडे (सहसंयोजकः)